मात्स्ये ।
"घण्टावितानवरतोरणचित्रयुक्तं
नित्योत्सवप्रमुदितेन जनेन सार्द्धम् ।
यः कारयेत् सुरगृहं विधिवद्ध्वजाङ्कं
श्रीस्तं न मुञ्चति सदा दिवि पूज्यते च ॥"
ध्वजयष्ट्यादिमानमाह हयशीर्षपञ्चरात्रम् ।
"ध्वजवंशः प्रकर्त्तव्यो निर्व्रणः सगुणो दृढः ।
तदूर्द्ध्वं ताम्रजं चक्रं सूक्ष्मं कुर्य्याद्द्विजोत्तम ! ॥
प्रासादस्य च विस्तारो मानं दण्डस्य कीर्त्तितम् ।
ध्वजयष्टिर्देवगृहे ऐशान्यां दिशि दैशिकैः ॥
स्थापनीयाथ वायव्ये साम्प्रतं ध्वजमुच्यते ।
पट्टकार्पासचीनाद्यैर्ध्वजं कुर्य्यात् सुशोभनम् ॥
एकवर्णं विचित्रं वा घण्टाचामरभूषितम् ।
किङ्किणीजालकोपेतं बर्हिपत्रविभूषितम् ।
शुक्लादिवर्णैर्विप्रादिः क्रमाद्वा कारयेत् ध्वजम् ॥
दण्डाग्राद्धरणीं यावत् हस्तैकं विस्तरेण तु ।
महाध्वजन्तु विख्यातं सर्व्वकामप्रदं शुभम् ॥
ध्वजेन रहितो विप्र प्रासादस्तु वृथा भवेत् ।
पूजाहोमादिकं सर्व्वं जपाद्यं यत् कृतं नरैः ॥"
शिवसर्व्वस्वे ।
"देवेभ्यश्च गृहं दद्याद् वाहनैरुपशोभितम् ।
तुरङ्गमेव सूर्य्यस्य हरस्य वृषचिह्नितम् ॥
विष्णवे गरुडाङ्कन्तु दुर्गायै सिंहचिह्नितम् ।
कार्य्यं ध्वजपताकाद्यमन्यथा न कथञ्चन ॥"
गरुड़लक्षणमाह नारदपञ्चरात्रे ।
"उपेन्द्रस्याग्रतः पक्षी गुड़ाकेशः कृताञ्जलिः ।
सव्यजानुगतो भूमौ स्वर्द्धादौ भक्तिमस्थितः ॥
पक्षिजङ्घो नराङ्घ्रिश्च तुङ्गनासो नराङ्गकः ।
द्विबाहुः पक्षयुक्तश्च कर्त्तव्यो विनतासुतः ॥"
विष्णुधर्म्मोत्तरे ।
"प्रतिपाद्य द्विजो दद्यात् ध्वजं चिरप्रवेक्षनः ।
निर्द्दहत्याशु पापानि महापातकजान्यपि ॥"
इति प्रतिष्ठातत्त्वम् ॥ * ॥
अथ ध्वजचिह्नविधिः ।
"सिंहारूढ़ा ध्वजे यस्य नृपस्य रिपुहा उमा ।
हारस्था पूज्यते वत्स ! न तस्य रिपुजं भयम् ॥
कपिसंस्था महामाया सर्व्वशत्रुविनाशिनी ।
वृषे यथेप्सितं दद्यात् कलसे श्रेय उत्तमम् ॥
हंसे विद्यार्थकामन्तु बर्हिणी सुतमिष्टदा ।
गजस्था महामाया सर्व्वरोगविनाशिनी ॥
महिषस्था महामारीः शमयेत् ध्वजसंस्थिता ।
करिगा सर्व्वकार्य्येषु नृपैः कार्य्या त्रिशूलिनी ॥
पद्मस्था चर्च्चिका रौप्या धर्म्मकामार्थमोक्षदा ।
प्रेतस्था सर्व्वभयहा नित्यं पशुनिपातनात् ॥
पूजिता देवराजेन्द्रनीलोत्पलकरावरा ।
भवति सिद्धकामस्य चिह्नाग्रे संव्यवस्थिता ॥
गन्धपुष्पार्च्चितं कृत्वा वस्त्रहेमसुचर्च्चितम् ।
फलशालियवस्तम्बवर्द्धमानविभूषितम् ॥
शोभने उच्छ्रयेत्तस्मै पताकां वा मनोरमाम् ॥
चामरं कलसं शुक्लमातपत्रं वितानकम् ।
भवति सिद्धकामस्य नृपस्य फलदायकम् ॥
नमो विश्वेश्वरि दुर्गे ! चामुण्डे पक्षहारिणि !।
ध्वजं समुच्छ्रयिष्यामि वसोर्धारां सुखावहाम् ॥"
अथ ध्वजदानविधिः ।
विश्वेश्वर उवाच ।
"यद्येवं सा महाभागा ब्रह्मविष्णुपरापरा ।
तदहं श्रोतुमिच्छामि ध्वजदानं विधानतः ॥
अगस्त्य उवाच ।
यथा त्वं पृच्छसे वत्स ! तथा शुक्रेण ब्रह्मणि ।
पृष्टः पूर्व्वं तथा तेन शम्भुगीतं प्रकाशितम् ॥
शुक्रस्य भावयुक्तस्य तदहन्ते महात्मनः ।
कथयामि यथान्यायं ध्वजदानं महाफलम् ॥
शुक्र उवाच ।
देव्या ध्वजप्रमाणन्तु विधिर्दत्तस्य लाञ्छनम् ।
दीयते च यथा नाथ ! तदशेषं ब्रवीहि नः ॥
ईश्वर उवाच ।
अण्डजं कृमिजं वापि ध्वजं केशविवर्ज्जितम् ।
नवं समञ्च श्लक्ष्णञ्च प्रासादाद्दण्डवर्द्धितम् ॥
समं श्लक्ष्णां मृदुं शुभ्रं शैलं वा धातुजं हि वा ॥
तस्मिन् पटे लिखेत् सिंहं सर्व्वलक्षणलक्षितम् ।
रोचना सह चन्द्रेण हेमलेखाद्यदूर्व्वया ॥
प्रासादाद्दोलमानन्तु चितिं विस्तरतः करम् ।
ध्वजापादेन कर्त्तव्या दर्शयेद्दिक्षु देवताः ॥
सर्व्वा वाहनलाञ्छेन लाञ्छिताः सहजेन च ।
किङ्किणीचामरोपेता घण्टादर्पणशोभिताः ॥
हुतहोमो महाप्राज्ञः सहकारदलान्वितान् ।
महामङ्गलशब्देन देव्याः कुम्भान् प्रपूजयेत् ॥
सुगन्धपुष्पनैवेद्ययथाविभवविस्तरैः ।
कन्यका ब्राह्मणान् भोज्य दधिपायसशर्करैः ॥
भूतानान्तु बलिं दत्त्वा तथा तमुपरोहयेत् ॥
सर्व्वकामानवाप्नोति विद्याधरपतिर्भवेत् ।
मोदते विविधान् भोगान् सर्व्वविद्यार्थपारगः ॥
अथवा हैमं रौप्यं वा वार्क्षं पार्थिवशैलजम् ।
कारयेन्मृगराजन्तु महाकरिमदापहम् ॥
महानखकरोत्खातमुक्ताफलपदप्रदम् ।
एवंविधं ततः कृत्वा नवम्यां पूजयेच्छिवाम् ॥
सोपवासः शुचिर्दक्षः सर्व्वसङ्गविवर्ज्जितः ।
कन्यकाः पूजयित्वा तु विप्रान् वेदविदस्ततः ॥
देव्या भक्ताः सदाचारास्त्रिकालहवने रताः ।
ते यथाशक्तितस्तोष्या ध्वजारोहणकर्म्मणि ॥
कन्या देव्या स्वयं प्रोक्ताः कन्यारूपा तु शूलिनी ।
यावदक्षतयोनिः स्यात्तावद्देवी हरारिहा ॥
द्विजो ब्रह्मा शिवो विष्णुः स्वकीयव्रतपालकः ।
पूजितैस्तैः सदा शुक्र सर्व्वदेवास्तु पूजिताः ॥
दीनान्धकृपणानान्तु अन्नं देयन्तु शक्तितः ।
यथा सर्व्वगता देवी तदुद्दिश्याक्षयं भवेत् ॥
नानाभक्ष्याक्षतदधिदूर्व्वातत्कणिकान्वितम् ।
बलिं वै सर्व्वभूतेभ्यो दशदिक्षु निवेदयेत् ॥
वज्रघोषा तथा जम्भा अष्टविंशाक्षरापि वा ।
सिंहं स्तम्भे समारोप्य सर्व्वमङ्गलशब्दितम् ॥
वेदध्वनिमहामन्त्रकालिकाचण्डिकापरम् ।
न्यस्य सिंहं परं ध्यायेद्यथादृशं पूर्व्वकल्पितम् ॥
एवन्तु वस्त्रसंवीतं सर्व्वाभरणभूषितम् ।
देव्या महाध्वजं न्यस्य शेषाणामपि विन्यसेत् ॥
ब्रह्मविष्ण्विन्द्ररुद्राणां सोमसूर्य्यदिवौकसाम् ।
ध्वजदानं महादानं सर्व्वदानोत्तमं मतम् ॥
यावन्नो दीयते शुक्र ! ध्वजः प्रासादमूर्द्धनि ।
तावत्तु न भवेद्वत्स ! प्रासादो देववाञ्छितः ॥
शून्यध्वजं सदा भूता नानागन्धर्व्वराक्षसाः ।
विद्रवन्ति महात्मानो नानाबाधाश्च कुर्व्वते ॥
तस्माद्देवगृहद्वारपुरपर्व्वतपत्तने ।
उच्छ्रिताः शान्तिकामाय ध्वजाः शुक्र ! सदा
स्थिताः ॥
न हि चान्यद्ध्वजदानादुत्तमं भारते क्वचित् ।
दानमिष्टञ्च पुष्टञ्च देव्या दीपस्तथैव च ॥
अनेन विधिना यस्तु ध्वजं शुक्र ! निवेदयेत् ।
सर्व्वकामानवाप्नोति स नरः शिवतां व्रजेत् ॥
तस्य दर्शनसम्भाषादपि पापरता नराः ।
विमुक्ताः सर्व्वपापेभ्यो दिवं यान्ति न संशयः ॥
राज्ञा चानेन विधिना देवीलाञ्छनरञ्जिताम् ।
शङ्खचक्रवृषभार्च्चहंसबर्हिणवारणैः ।
साचारो भक्तिमास्थाय ध्वजयष्टिं समुच्छ्रयेत् ।
न तस्य सङ्गरे शुक्र ! व्याधयो न च वैरिणः ।
नैव शस्त्रव्रणपीड़ा भवेच्छ्रां स समुच्छ्रयेत् ॥"
इति देवीपुराणम् ॥

ध्वजद्रुमः, पुं, (ध्वज इव उन्नतो द्रुमः । दीर्घत्वात् तथात्वम् ।) तालवृक्षः । माड़वृक्षः । इति राजनिर्घण्टः ॥

ध्वजप्रहरणः, पुं, (ध्वजं प्रहरति नाशयति भनक्तीति । प्र+हृ+ल्युः । ध्वजस्य प्रहरणो वा।) वायुः । इति शब्दरत्नावली ॥

ध्वजभङ्गः, पुं, (ध्वजस्य मेढ्रस्य भङ्गः ।) क्लीवत्वजनकरोगविशेषः । तस्य निदानं यथा,—
"अत्यम्ललवणक्षारविरुद्धाशनभोजनात् ।
तथाम्बुपानाद्विषमात् पिष्टान्नगुरुभोजनात् ॥
दधिक्षीरानूपमांससेवनाद्व्याधिकर्षणात् ।
कन्याश्चैगमनाच्चापि वियोनिगमनादपि ॥
दीर्घरोम्नीं चिरोत्सृष्टां तथैव च रजस्वलाम् ।
दुर्गन्धां दुष्टयोनिञ्च तथैव च परिस्रुताम् ॥
ईदृशीं प्रमदां मोहात् यदि गच्छति मानवः
चतुःपदाभिगमनाच्छेफसश्चाभिघाततः ।
अधावनाच्च मेढ्रस्य शस्त्रदन्तनखक्षतात् ॥
काष्ठप्रहारनिष्पेषशूकानाञ्च निषेवणात् ।
रेतसश्च प्रतीघातात् ध्वजभङ्गः प्रवर्त्तते ॥"
इति चरकः ॥ * ॥
तस्य चिह्नं यथा,—
"शुक्रे चिरात् प्रसिच्येत शुक्रं शोणितमेव वा ।
तोदोऽत्यर्थं वृषणयोर्मेढ्रं धूपायतीव च ॥"
इति वाभटः ॥ * ॥
अपि च ।
"तैस्तैर्भावैरहृद्यैश्च रिरंसोर्मनसि क्षते ।
ध्वजः पतत्यधो नृणां क्लैब्यं सद्यः प्रजायते ॥
भक्ष्यैरम्लोष्णलवणैरतिमात्रोपसेवितैः ।
सौम्यधातुक्षयाद्दुष्टः क्लैब्यं तदपरं स्मृतम् ॥
अतिव्यवायशीलो यो न च वाजिक्रियारतः ।
ध्वजभङ्गमवाप्नोति स शुक्रक्षयहेतुकम् ॥